# दुर्गा सूक्तम्

ॐ ॥ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्-षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

अग्ने त्वं पारया नव्यो अस्मान्थ्-स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्-षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥

पृतना जितगं सहमानमुग्रमग्निगं हुवेम परमाथ्-सधस्थात् ।
स नः पर्-षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र विष्णोरनुसञ्चरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥